# Natya Shastra Chapter 11

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૧

## Document Information

Text title : naaTyashaastra adhyaaya 11 maNDalavidhaanaM

File name : natya11.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : February 16, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Natya Shastra Chapter 11

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૧

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ એકાદશોઽધ્યાયઃ ।

એતાશ્ચાર્યો મયા પ્રોક્તા યથાવચ્છસ્ત્રમોક્ષણે ।
ચારીસંયોગજાનીહ મણ્ડલાનિ નિબોધત ॥ ૧॥

અતિક્રાન્તં વિચિત્રં ચ તથા લલિતસઞ્ચરમ્ ।
સૂચીવિદ્ધં દણ્ડપાદં વિહૃતાલાતકે તથા ॥ ૨॥

વામબન્ધં સલલિતં ક્રાન્તઞ્ચાકાશગામિ ચ ।
મણ્ડલાનિ દ્વિજશ્રેષ્ઠાઃ ! ભૂમિગાનિ નિબોધત ॥ ૩॥

ભ્રમરાસ્કન્દિતે સ્યાતામાવર્તં ચ તતઃ પરમ્ ।
સમાક્રન્દિતમપ્યાહુરેડકાક્રીડિતં તથા ॥ ૪॥

અડ્ડિતં શકટાસ્યં ચ તથાઽધ્યર્ધકમેવ ચ ।
પિષ્ટકુટ્ટં ચ વિજ્ઞેયં તથા ચાષગતં પુનઃ ॥ ૫॥

એતાન્યપિ દશોક્તાનિ ભૂમિગાનીહ નામતઃ ।
આદ્યં પાદં ચ જનિતં કૃત્વોદ્વાહિતમાચરેત્ ॥ ૬॥

અલાતં વામકં ચૈવ પાર્શ્વક્રાન્તં ચ દક્ષિણમ્ ।
સૂચીવામં પુનશ્ચૈવ પાર્શ્વક્રાન્તં ચ દક્ષિણમ્ ॥ ૭॥

સૂચીં વામક્રમં દદ્યાદપક્રાન્તં ચ દક્ષિણમ્ ।
સૂચીવામં પુનશ્ચૈવ ત્રિકં ચ પરિવર્તયેત્ ॥ ૮॥

તથા દક્ષિણમુદ્વૃત્તમલાતઞ્ચૈવ વામકમ્ ।
પરિચ્છિન્નં તુ કર્તવ્યં બાહ્યભ્રમરકેણ હિ ॥ ૯॥

અતિક્રાન્તં પુનર્વામં દણ્ડપાદઞ્ચ દક્ષિણમ્ ।

વિજ્ઞેયમેતદ્ વ્યાયામે ત્વતિક્રાન્તં તુ મણ્ડલમ્ ॥ ૧૦॥

આદ્યં તુ જનિતં કૃત્વા તેનૈવ ચ નિકુટ્ટકમ્ ।
આસ્પન્દિતં તુ વામેન પાર્શ્વક્રાન્તં ચ દક્ષિણમ્ ॥ ૧૧॥

વામં સૂચીપદં દદ્યાદપક્રાન્તઞ્ચ દક્ષિણમ્ ।
ભુજઙ્ગત્રાસિતં વામમતિક્રાન્તં ચ દક્ષિણમ્ ॥ ૧૨॥

ઉદ્વૃત્તં દક્ષિણં ચૈવાડલાતં ચૈવાત્ર વામકમ્ ।
પાર્શ્વક્રાન્તં પુનઃ સવ્યં સૂચીવામક્રમં તથા ॥ ૧૩॥

વિક્ષેપો દક્ષિણસ્ય સ્યાદપક્રાન્તં ચ વામકમ્ ।
બાહ્યભ્રમરકં ચૈવ વિક્ષેપં ચૈવ યોજયેત્ ॥ ૧૪॥

વિજ્ઞેયમેતદ્વ્યાયામે વિચિત્રં નામ મણ્ડલમ્ ।
કૃત્વોર્ધ્વજાનુચરણમાદ્યં સૂચીં પ્રયોજયેત્ ॥ ૧૫॥

અપક્રાન્તઃ પુનર્વામ આદ્યઃ પાર્શ્વગતો ભવેત્ ।
વામસૂચીં પુનર્દદ્યાત્ ત્રિકઞ્ચ પરિવર્તયેત્ ॥ ૧૬॥

પાર્શ્વક્રાન્તં પુનશ્ચાદ્યમતિક્રાન્તઞ્ચ વામકમ્ ।
સૂચીવામક્રમં કૃત્વા હ્યપક્રાન્તશ્ચ વામકમ્ ॥ ૧૭॥

પાર્શ્વક્રાન્તં પુનશ્ચાદ્યમતિક્રાન્તં ચ વામકમ્ ।
પરિચ્છિન્નં ચ કર્તવ્યં બાહ્યભ્રમણકેન હિ ॥ ૧૮॥

એષ ચારીપ્રયોગસ્તુ કાર્યો લલિતસઞ્ચરૈઃ ।
સૂચીવામપદં દદ્યાત્ ત્રિકઞ્ચ પરિવર્તયેત્ ॥ ૧૯॥

પાર્શ્વક્રાન્તઃ પુનશ્ચાદ્યો વામોઽતિક્રાન્ત એવ ચ ।
સૂચીમાદ્યં પુનર્દદ્યાદતિક્રાન્તઞ્ચ વામકમ્ ॥ ૨૦॥

પાર્શ્વક્રાન્તં પુનશ્ચાદ્યં સૂચીવિદ્ધે તુ મણ્ડલે ।
આદ્યસ્તુ જનિતો ભૂત્વા સ ચ દણ્ડક્રમો ભવેત્ ॥ ૨૧॥

વામસૂચીં પુનર્દદ્યાત્ ત્રિકઞ્ચ પરિવર્તયેત્ ।
ઉદ્વૃત્તો દક્ષિણશ્ચ સ્યાદલાતશ્ચૈવ વામકઃ ॥ ૨૨॥

પાર્શ્વક્રાન્તઃ પુનશ્ચાદ્યો ભુજઙ્ગત્રાસિતસ્તથા ।
અતિક્રાન્તઃ પુનર્વામો દણ્ડપાદશ્ચ દક્ષિણઃ ॥ ૨૩॥

વામસૂચીત્રિકાવર્તો દણ્ડપાદે તુ મણ્ડલે ।
આદ્યં તુ જનિતં કૃત્વા તેનૈવ ચ નિકુટ્ટકમ્ ॥ ૨૪॥

આસ્પન્દિતં ચ વામેન હ્યુદ્વૃત્તં દક્ષિણેન ચ ।
અલાતં વામકં પાદં સૂચીં દદ્યાત્તુ દક્ષિણમ્ ॥ ૨૫॥

પાર્શ્વક્રાન્તઃ પુનર્વામ આક્ષિપ્તો દક્ષિણસ્તથા ।
સમાવર્ત્ય ત્રિકં ચૈવ દણ્ડપાદં પ્રસારયેત્ ॥ ૨૬॥

સૂચીવામપદં દદ્યાત્ ત્રિકં તુ પરિવર્તયેત્ ।
ભુજઙ્ગત્રાસિતશ્ચાદ્યો વામોઽતિક્રાન્ત એવ ચ ॥ ૨૭॥

એષ ચારીપ્રયોગસ્તુ વિહૃતે મણ્ડલે ભવેત્ ।
સૂચીમાદ્યક્રમં કૃત્વા ચાઽપક્રાન્તં ચ વામકમ્ ॥ ૨૮॥

પાર્શ્વક્રાન્તસ્તતશ્ચાદ્યોઽપ્યલાતશ્ચૈવ વામકઃ ।
ભ્રાન્ત્વા ચારીભિરેતાભિઃ પર્યાયેણાથ મણ્ડલમ્ ॥ ૨૯॥

ષટ્સંખ્યં સપ્તસંખ્યં ચ લલિતૈઃ પાદવિક્રમૈઃ ।
અધિકુર્યાદપક્રાન્તમતિક્રાન્તં ચ વામકમ્ ॥ ૩૦॥

અપક્રન્તઃ પુનશ્ચાદ્યો વામોઽતિક્રાન્ત એવ ચ ।
પાદભ્રમરકશ્ચ સ્યાદલાતે ખલુ મણ્ડલે ॥ ૩૧॥

સૂચીમાદ્યક્રમં કૃત્વા હ્યપક્રાન્તં ચ વામકમ્ ।
આદ્યો દણ્ડક્રમશ્ચૈવ સૂચીપાદસ્તુ વામકઃ ॥ ૩૨॥

કાર્યસ્ત્રિકવિવર્તશ્ચ પાર્શ્વક્રાન્તશ્ચ દક્ષિણઃ ।
આક્ષિપ્તં વામકં કુર્યાત્ દણ્ડપાર્શ્વં ચ દક્ષિણમ્ ॥ ૩૩॥

ઉરુદ્વૃત્તં ચ તેનૈવ કર્તવ્યં દક્ષિણેન તુ ।
સૂચીવામક્રમં કૃત્વા ત્રિકં ચ પરિવર્તયેત્ ॥ ૩૪॥

અલાતશ્ચ ભવેદ્વામઃ પાર્શ્વક્રાન્તશ્ચ દક્ષિણઃ ।
અતિક્રાન્તઃ પુનર્વામો વામબન્ધે તુ મણ્ડલે ॥ ૩૫॥

સૂચીમાદ્યક્રમં કૃત્વા હ્યપક્રાન્તં ચ વામકમ્ ।
પાર્શ્વક્રાન્તઃ પુનશ્ચાદ્યો ભુજઙ્ગત્રાસિતઃ સ ચ ॥ ૩૬॥

અતિક્રાન્તઃ પુનર્વામ આક્ષિપ્તો દક્ષિણસ્તથા ।
અતિક્રાન્તઃ પુનર્વામ ઉરુદ્વૃત્તસ્તથૈવ ચ ॥ ૩૭॥

અલાતશ્ચ પુનર્વામઃ પાર્શ્વક્રાન્તશ્ચ દક્ષિણઃ ।
સૂચીવામં પુનર્દદ્યાદપક્રાન્તસ્તુ દક્ષિણઃ ॥ ૩૮॥

અતિક્રાન્તઃ પુનર્વામઃ કાર્યો લલિતસંજ્ઞકઃ ।
એષ પાદપ્રસારસ્તુ લલિતે મણ્ડલે ભવેત્ ॥ ૩૯॥

સૂચીવામક્રમં કૃત્વા હ્યપક્રાન્તશ્ચ વામકમ્ ।
પાર્શ્વક્રાન્તં પુનશ્ચાદ્યં વામપાર્શ્વક્રમં તથા ॥ ૪૦॥

ભ્રાન્ત્વા ચારીભિરેતાભિઃ પર્યાયેણાથ મણ્ડલમ્ ।
વામસૂચીં તતો દદ્યાદપક્રાન્તં ચ દક્ષિણમ્ ॥ ૪૧॥

સ્વભાવગમને હ્યેતન્મણ્ડલં સંવિધીયતે ।
ક્રાન્તમેતત્તુ વિજ્ઞેયં નામતો નાટ્યયોક્તૃભિઃ ॥ ૪૨॥

એતાન્યાકાશગામીનિ જ્ઞેયાન્યેવં દશૈવ તુ ।
અતઃ પરં પ્રવક્ષ્યામિ ભૌમાનામિહ લક્ષણમ્ ॥ ૪૩॥

આદ્યસ્તુ જનિતઃ કાર્યો વામશ્ચાસ્પન્દિતો ભવેત્ ।
શકટાસ્યઃ પુનશ્ચાદ્યો વામશ્ચાપિ પ્રસારિતઃ ॥ ૪૪॥

આદ્યો ભ્રમરકઃ કાર્યસ્ત્રિકં ચ પરિવર્તયેત્ ।
આસ્કન્દિતઃ પુનર્વામઃ શકટાસ્યશ્ચ દક્ષિણઃ ॥ ૪૫॥

વામઃ પૃષ્ઠાપસર્પી ચ દદ્યાદ્ ભ્રમરકં તથા ।
સ એવાસ્પન્દિતઃ કાર્યસ્ત્વેતદ્ ભ્રમરમણ્ડલમ્ ॥ ૪૬॥

આદ્યો ભ્રમરકઃ કાર્યો વામશ્ચૈવાડ્ડિતો ભવેત્ ।
કાર્યસ્ત્રિકવિવર્ત્તશ્ચ શકટાસ્યશ્ચ દક્ષિણઃ ॥ ૪૭॥

ઉરુદ્વૃત્તઃ સ એવ સ્યાદ્વામશ્ચૈવાપસર્પિતઃ ।
કાર્યસ્ત્રિકવિવર્ત્તશ્ચ દક્ષિણઃ સ્પન્દિતો ભવેત્ ॥ ૪૮॥

શકટાસ્યો ભવેદ્વામસ્તદેવાસ્ફોટનં ભવેત્ ।
એતદાસ્પન્દિતં નામ વ્યાયામે યુદ્ધમણ્ડલમ્ ॥ ૪૯॥

આદ્યસ્તુ જનિતં કૃત્વા વામશ્ચૈવ નિકુટ્ટકમ્ ।
શકટાસ્યઃ પુનશ્ચાદ્ય ઉરુદ્વૃત્તઃ સ એવ તુ ॥ ૫૦॥

પૃષ્ઠાપસર્પી વામશ્ચ સ ચ ચાષગતિર્ભવેત્ ।

આસ્પન્દિતઃ પુનર્દક્ષઃ શકટાસ્યશ્ચ વામકઃ ॥ ૫૧॥

આદ્યો ભ્રમરકશ્ચૈવ ત્રિકં ચ પરિવર્તયેત્ ।
પૃષ્ઠાપસર્પી વામશ્ચેત્યાવર્તં મણ્ડલં ભવેત્ ॥ ૫૨॥

સમપાદં બુધઃ કૃત્વા સ્થાનં હસ્તૌ પ્રસારયેત્ ।
નિરન્તરાવૂર્ધ્વતલાવાવેષ્ટ્યોદ્વેષ્ટ્ય ચૈવ હિ ॥ ૫૩॥

કટીતટે વિનિક્ષિપ્ય ચાદ્યમાવર્ત્તયેત્ ક્રમાત્ ।
યથાક્રમં પુનર્વામમાવર્તેન પ્રસારયેત્ ॥ ૫૪॥

ચારયા ચાનયા ભ્રાન્ત્વા પર્યાયેણાથ મણ્ડલમ્ ।
સમોત્સરિતમેતત્તુ કાર્યં વ્યાયામમણ્ડલમ્ ॥ ૫૫॥

પાદૈસ્તુ ભૂમિસંયુક્તૈઃ સૂચીવિદ્ધૈસ્તથૈવ ચ ।
એડકાક્રીડિતૈશ્ચૈવ તૂર્ણૈસ્ત્રિકવિવર્તિતૈઃ ॥ ૫૬॥

સૂચીવિદ્ધાપવિદ્ધૈશ્ચ ક્રમેણાવૃત્ત્ય મણ્ડલમ્ ।
એડકાક્રીડિતં વિદ્યાત્ ખણ્ડમણ્ડલસંજ્ઞિતમ્ ॥ ૫૭॥

સવ્યમુદ્ઘટ્ટિતં કૃત્વા તેનૈવાવર્તમાચરેત્ ।
તેનૈવાસ્કન્દિતઃ કાર્યઃ શકટાસ્યશ્ચ વામકઃ ॥ ૫૮॥

આદ્યઃ પૃષ્ઠાપસર્પી ચ સ ચ ચાષગતિર્ભવેત્ ।
અડ્ડિતશ્ચ પુનર્વામ આદ્યશ્ચૈવાપસર્પિતઃ ॥ ૫૯॥

વામો ભ્રમરકઃ કાર્ય આદ્ય આસ્કન્દિતો ભવેત્ ।
તેનૈવાસ્ફોટનં કુર્યાદેતદડ્ડિતમણ્ડલમ્ ॥ ૬૦॥

આદ્યં તુ જનિતં કૃત્વા તેનૈવ ચ નિકુટ્ટકમ્ ।
સ એવ શકટાસ્યશ્ચ વામશ્ચાસ્કન્દિતો ભવેત્ ॥ ૬૧॥

વિજ્ઞેયં શકટાસ્યં તુ વ્યાયામે યુદ્ધમણ્ડલમ્ ।
પાદૈશ્ચ શકટાસ્યસ્થૈઃ પર્યાયેણાથ મણ્ડલમ્ ॥ ૬૨॥

આદ્યસ્તુ જનિતો ભૂત્વા સ એવાસ્કન્દિતો ભવેત્ ।
અપસર્પી પુનર્વામઃ શકટાસ્યશ્ચ દક્ષિણઃ ॥ ૬૩॥

ભ્રાન્ત્વા ચારીભિરેતાભિઃ પર્યાયેણાથ મણ્ડલમ્ ।
અધ્યર્ધમેતદ્વિજ્ઞેયં નિયુદ્ધે ચાપિ મણ્ડલમ્ ॥ ૬૪॥

સૂચીમાદ્યક્રમં કૃત્વા હ્યપક્રાન્તં ચ વામકમ્ ।
ભુજઙ્ગત્રાસિતશ્ચાદ્ય એવમેવ તુ વામકઃ ॥ ૬૫॥

ભુજઙ્ગત્રાસિતૈર્ભ્રાન્ત્વા પાદૈરપિ ચ મણ્ડલમ્ ।
પિષ્ટકુટ્ટં ચ વિજ્ઞેયં ચારીભિર્મણ્ડલં બુધૈઃ ॥ ૬૬॥

સર્વૈશ્ચાષગતૈઃ પાદૈઃ પરિભ્રામ્ય તુ મણ્ડલમ્ ।
એતચ્ચાષગતં વિદ્યાન્નિયુદ્ધે ચાપિ મણ્ડલમ્ ॥ ૬૭॥

નાનાચારીસમુત્થાનિ મણ્ડલાનિ સમાસતઃ ।
ઉક્તાન્યતઃ પરં ચૈવ સમચારીણિ યોજયેત્ ॥ ૬૮॥

સમચારીપ્રયોગો યસ્તત્સમં નામ મણ્ડલમ્ ।
આચાર્યબુદ્ધ્યા તાનીહ કર્તવ્યાનિ પ્રયોક્તૃભિઃ ॥ ૬૯॥

એતાનિ ખણ્ડાનિ સમણ્ડલાનિ યુદ્ધે નિયુદ્ધે ચ પરિક્રમે ચ ।
લીલાઙ્ગમાધુર્યપુરસ્કૃતાનિ કાર્યાણિ વાદ્યાનુગતાનિ તજ્જ્ઞૈઃ ॥ ૭૦॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે મણ્ડલવિધાનં નામ
એકાદશોઽધ્યાયઃ સમાપ્તઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 11*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*